International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 41-51
© 2021 IJSR
www.anantaajournal.com
Received: 08-05-2021
Accepted: 19-06-2021

**अर्पितानाथः**

सहायकाध्यापकः, संस्कृतविभागः

वासन्तीदेवीमहाविद्यालयः,

पश्चिमबङ्गः, भारत

**Corresponding Author:**
**अर्पितानाथः**

सहायकाध्यापकः, संस्कृतविभागः

वासन्तीदेवीमहाविद्यालयः,

पश्चिमबङ्गः, भारत

# लोकायतप्रस्थाने व्याप्तितत्त्वखण्डनसमीक्षणम्

## अर्पितानाथः

**सारांशिका**

दार्शनिकतत्त्वानां भारतीयदर्शनवाङ्मये लोकायतदर्शनं तथा चार्वाकदर्शनं महत्वपूर्णं स्थानमलभत्। लोकायतदर्शनं चार्वाकदर्शनस्यापरं नाम। साधारणलोकसमाजे सर्वाधिकं रमणीयं प्रस्थानमिदं दर्शनं वा – तद्धेतौ दर्शनस्यास्य नाम लोकायतदर्शनम्। तदपि च शरीरसम्बन्धीयसुखभोग एव तथा कामः परमपुरुषार्थरूपेणास्मिन् वाङ्मये स्वीकृतः। तस्मादस्य प्रस्थानस्यापरं नाम खलु चार्वाकदर्शनम्। परम्परायां प्रचलितमस्ति दोवानां गुरुः बृहस्पतिः दैत्यगुरुशुक्राचार्यस्य वेशेनासुराणां समीपे मतमिदं कथितवान् तथा च दैत्याः तन्मतं सानन्देन गृहीतवन्तः। मतमिदं जनसमाजे सर्वाधिकं प्रचलितमिति कारणात् लोकायतमिति नामकरणम्। अतीतानागतादिविषयोऽस्मिन् प्रस्थाने नाङ्गीकृतः। अपि चानुमानादिप्रमाणं लोकायतदर्शने न स्वीकृतम्। परन्तु प्रमाणरूपेण केवलं प्रत्यक्षप्रमाणं दर्शनेऽस्मिन्नङ्गीकृतम्। एतस्मात् कारणादस्मिन् प्रस्थाने शरीरातिक्तमात्मतत्त्वं जन्मान्तरवाद ईश्वरतत्त्वं प्रसिद्धमोक्षतत्त्वं न स्थिरीकृतम्। यतो ह्येतादृशं तत्त्वं न प्रत्यक्षप्रमाणेन सिद्धम्। परन्तु पूर्वोक्तसर्वतत्त्वमनुमानादिप्रमाणैः सिद्धम्। भारतीयदर्शनवाङ्मयेऽष्टविधं प्रमाणं प्रसिद्धम्। तेष्वष्टप्रमाणेषु प्रत्यक्षानुमानशब्दप्रमाणत्रयं प्रायेण चार्वाकव्यतिरिक्ते सर्वदर्शने स्वीकृतम्। उपमानशब्दप्रमाणखण्डने लोकायतिकानां युक्तिः सर्वजनमनोहरा। अधिकन्त्वनुमानप्रमाणखण्डने तेषां चार्वाकानां सूक्ष्मविचारशैली लक्षणीया। अनुमानप्रमाणं व्याप्तिज्ञानजन्यं तथा व्याप्तिज्ञानमुपाधिज्ञानजन्यमिति कारणात् तत्रानुमाने प्रमाणेऽनवस्थादोषं प्रदश्र्य चार्वाकाः महत्वं प्रदर्शितवन्तः। यतः लोकायतिकारुपाधिज्ञाने दोषमाविस्कृत्य व्याप्तिज्ञानेऽपि दोषमाविस्कृतवन्तः। अनेन प्रकारेण दुष्टोपाधिजन्यं दुष्टव्याप्तिज्ञानं तथा दुष्टव्याप्तिज्ञानजन्यं दुष्टानुमानमिति हेतौ चार्वाकनये नैपुण्येनानुमानमस्वीकृतमिति विषयः प्रबन्धेऽस्मिन्नालोचनायाः सारात्सारः।

**प्रमुखशब्दाः** - दर्शनम्, प्रमाणम्, प्रत्यक्षम्, अनुमानम्, व्याप्तिः, उपाधिः, उपमानम्, शब्दः

**उपक्रमणिका**

समग्रे विश्वेऽस्मिन् भारतबर्षस्य संस्कृतेर्परम्परायाश्च प्रतिफलनं सर्वजनप्रसिद्धमिति। भारतबर्षीयसंस्कृतेर्परम्परायाश्च वाहिका धात्री च गङ्गा गोदा संस्कृतभाषा च।

यथा गङ्गायां गोदायाञ्च पूण्यं सलिलमासमुद्रहिमाचलात् प्रवहति तथा संस्कृतभाषायां निहिता विद्यारम्भकालादेव सश्रद्धया मनस्विनां मनसि प्रवहति। सत्यस्वरूपपरमतत्त्वमुद्घाटनाय तपस्विषु चित्तेषु विद्यारूपं महाधनं समुत्पन्नम्। शुद्धा विद्येयं द्विविधा परापरभेदेन। ब्रह्मप्रतिपादका विद्या पराविद्या स्यात्। एवंप्रकारेण ब्रह्मप्रतिपादिका भिन्ना परन्तु तद्सहायिका विद्याऽपराविद्येति परिचिता। अस्मिन् प्रसङ्गे मुण्डकोपनिषद्युक्तम् - द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च। तत्रापरा – ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा – यया तदक्षरमधिगम्यते। (अतुलचन्द्र सेन) अपराविद्यापराविद्योत्युभयोरुपासनामाध्यमेन परमसत्यब्रह्मस्वरूपे मोक्षरूपपरमवस्तुन्युन्नीतं भवति – एतादृशमालोचनं दर्शनशास्त्रस्य मुख्यतममुद्देश्यम्। तद्धेतौ दर्शनपदस्य लक्षणविषये भिन्नभिन्नमतानामुल्लिखितेऽपि तदभ्यन्तरे परमैक्यस्य बीजं सूक्षरूपेण सन्निबद्धमस्ति। संस्कृतं तथा दर्शनवाङ्मये प्राप्यते – दृश्यते साक्षात्क्रियते परमात्मादिसंज्ञासंज्ञितः परमपुरुषः येन तद्दर्शनम्। (उपैति) परत्राप्युक्तम् – दृश्यते ज्ञायते विचार्यते अनेन इति दर्शनम्। (गौड) दृश्यते अनेन इत्यस्मिन् विग्रहवाक्ये प्रेक्षणार्थकदृशिरिति धातुना समं करणाधिकरणयोश्चेति (शास्त्री) पाणीनीयसूत्रेण ल्युड्प्रत्ययेगेन दर्शनशब्दस्य सिद्धिः। रुढ्यर्थस्वीकरणे दर्शनमिति पदस्यार्थः दर्शनशास्त्रमिति। प्रकृत्या परमसत्यस्वरूपनियामकशास्त्रमिति दर्शनशास्त्रम्। एवं प्रकारेण भारतीयपरम्परायां शास्त्रे संस्कृतौ च दर्शनशास्त्रमिदं विचारार्थकशास्त्ररूपेण गृहीतम्। यद्यपि तद् परमसत्यस्वरूपनिरूपकशास्त्रं तथापि कालानुक्रमानुसारेण मननभेदेन विचारवैचित्र्येण च भारतीयदर्शनं द्विधाविभक्तं जातमास्तिकनास्तिकभेदेन । आस्तिकनास्तिकपदयोरर्थयोः निरूपणप्रसङ्गेनाष्टाध्यायीग्रन्थे पाणिनीयसूत्रे सम्यक्तया परिस्कृतं यत् – अस्तिनास्तिदिष्टं मतिः। (शास्त्री) अर्थात् अस्तीति यस्य मतिः स आस्तिकः नास्तीति यस्य मतिः सः नास्तिकः। महता वैयाकरणेन श्रीभट्टोजीदीक्षितानाप्यामन्त्रितम् – अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः, नास्तीति मतिर्यस्य सः नास्तिकः। (शास्त्री) तथापि भारतीयदर्शनस्य विभाजनपरम्परायामेतद्व्याख्यानं युक्तियुक्तरूपेण नोपादेयं स्यात्। तेन कारणेन भगवत्पूज्यपादेन मनुनोद्घोषितमास्तिकनास्तिकाश्रितं व्याख्यानं सर्वजनमनोऽभिराममिति।

मनुकथितास्तिकनास्तिकलक्षणविषयकश्लोकोऽयं यथा –

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः।
स साधुभिर्वहिष्कार्यो नास्तिको वेदनिन्दकः।। (तर्करत्न)

अतोऽनेन श्लोकेनेदृशं चिन्तनं प्रतीयते यत् वेदादिनां प्रामाण्ये विश्वासिनः भवन्त्यास्तिकाः। वेदानां प्रामाण्येऽविश्वासिनः भवन्ति नास्तिकाः। नास्तिकदर्शनं प्रधानतया त्रिविधम्। यथा – चार्वाकाः बौद्धाः जैनाश्च। अपरं यद्भवत्यास्तिकदर्शनं तद्भवति प्रसिद्धरूपेण षड्प्रकारकम्। यथा – सांख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तश्च। प्रतिदर्शनं यथार्थज्ञानानुसन्धाने निरतो भवति। एवञ्च प्रत्येकस्य दर्शनस्य यदालोच्यविषयो भवति तत्तु प्रमायाः विषयः प्रमेयमिति नाम्नाऽभिहितम्। अनेन प्रकारेण बुद्धिस्तथा ज्ञानमपि – सर्वव्यवहारहेतुर्गुणः (गोस्वामी) स्यात् तर्कसंग्रहकारस्यान्नंभट्टस्य मतानुसारेण। बुद्धिस्तु द्विधा। तत्र तर्ककसंग्रहे कथितमन्नंभट्टेन – स्मृतिरनुभवश्च। स्मृतिः संस्कारमात्र-जन्यं ज्ञानम् (गोस्वामी)। अनुभवस्तु द्विविधः यथार्थायथार्थभेदेन। यथार्थानुभवः प्रमेत्युच्यते। प्रमाकरणं प्रमाणम्। (लायेक)

**प्रमाणतत्त्वम् -**

भारतीयदर्शनवाङ्मये प्रमाणमष्टविधम्। तद्यथा –

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ।
भासर्वज्ञश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः।
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्।। (त्रिपाठी)

अस्याः कारिकायाः संक्षिप्तार्थः निम्नरूपेणोपस्थाप्यते –

**सम्प्रदायः** **स्वीकृतप्रमाणम् + संख्या**

1. चार्वाकः - प्रत्यक्षम् =1
2. बौद्धः+वैशेषिकः - प्रत्यक्षम्, अनुमानम् =2
3. भासर्वज्ञः+सांख्यः+योगः -प्रत्यक्षम्, अनुमानम्, शब्दः =3
4. न्यायः - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः =4
5. प्राभाकरमीमांसा - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, अर्थापत्तिः=5
6. भाट्टमीमांसा+वेदान्तः - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, अर्थापत्तिः, अनुपलब्धिः =6
7. पौराणिकः - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, अर्थापत्तिः, अनुपलब्धिः, सम्भवम्, ऐतिह्यम् =8

**प्रसिद्धप्रमाणम् -**

तथोक्तेषु प्रमाणाष्टकेषु सांख्यसूत्रे सांख्यकारिकायां तत्त्वकौमुदीटीकायाञ्च तथा सांख्ययोगदर्शने प्रत्यक्षमनुमानं शब्दरिति प्रमाणत्रयं प्रसिद्धम्। श्रीमतेश्वरकृष्णेन सांख्यकारिकायामुच्चारितम् –

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।। (शर्मा)

एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्तीति सांख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रेणोक्तम्। (शुक्ल) चार्वाकदर्शनेऽनुमानप्रमाणं शब्दप्रमाणञ्च अस्वीकृतम्। तेषां मते तु – प्रत्यक्षमेव प्रमाणम्। (भट्टाचार्य) अतः प्रत्यक्षप्रमाणस्याङ्गीकरणेऽनुमानशब्दप्रमाणमस्वीकरणे लोकायतिकानां चार्वाकानां वा सूक्ष्मयुक्तिसौष्ठवं प्रदर्शनं कर्तव्यमिति। तद्धेतौ प्रत्यक्षप्रमाणस्यानन्तरं यस्मादनुमानं तथा शब्दप्रमाणमुपस्थापितं भवति तर्हि सर्वाग्रेऽनुमानप्रमाणखण्डनं तदनन्तरं शब्दप्रमाणखण्डनपूर्वकं प्रत्यक्षप्रमाणमण्डनं कृतं चार्वाकेन तथा लोकायतिकेन।

**अनुमानप्रमाणे प्रवेशः –**

लोकायतदर्शनभिन्नदर्शनशास्त्रपरम्परायामात्मा पृथक्तत्त्वरूपेण स्वीकृतम्। तर्कसंग्रहे कथितमस्ति – ज्ञानाधिकरणमात्मा। परन्तु लोकायतिकनये आत्मा भिन्नतत्त्वरूपेण न प्रसिद्धम्। इदमात्मा पुरुषपदेनापि प्रतिज्ञातं सांख्यदर्शने। किन्तु चार्वाकनयेऽभिहितम् – चैतन्यविशिष्टः कायः पुरुषः। (भट्टाचार्य) अतः आत्मार्थे देह एव स्वीकृतः चार्वाकनये। तत्रोच्यते –

अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः।
चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते।
किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।। (भट्टाचार्य)

यद्वत् किण्वादिफलानां संमिश्रणेनैव मदशक्तिर्जायते तद्वत् मृत्तिका जलं वह्निः वायुरिति चतुर्भूतसंयोगेनापि चैतन्यं जातमिति चार्वाकाः प्रवदन्ति। यस्मात् अहं स्थूलः, अहं कृशः इत्यादौ अहकारत्वं स्थूलत्वं कृशत्वञ्च समानाधिकरण्येन तिष्ठति। तस्मादुच्यते सर्वदर्शनसंग्रहे चार्वाकदर्शने – तच्चैतन्यविशिष्टदेह एवात्मा। (चक्रवर्ती) देहातिरिक्तात्मनः पृथगास्तित्वास्वीकारस्य पश्चात् लोकायतिकानां सर्वोत्कृष्टं युक्तिसम्मतं मतं भवति यत् चार्वाकदर्शनभिन्नप्रस्थाने देहातिरिक्तमात्मा नामकं यत् पृथक्तत्त्वमस्ति तद्विषये नास्ति किमपि प्रमाणम्। तत्र बार्हस्पत्यसूत्रे कथितमस्ति – देहातिरिक्तात्मनि प्रमाणाभावात्। (चक्रवर्ती) अधुना जातं यत् गुरुत्वपूर्णं तत्त्वं तद्भवति – प्रसिद्धं प्रमाणमष्टविधम्। एतेष्वष्टविधेषु प्रमाणेषु सर्वप्रसिद्धं प्रमाणं त्रिविधं यदुक्तमितःपूर्वमेव। तत्त्रिविधं प्रमाणं भवति – प्रत्यक्षमनुमानं शब्दश्चेति। एतेषु त्रिविधेष्वष्टविधेषु वा प्रमाणेषु नास्ति किञ्चिदपि प्रमाणं येनात्मनः पृथगस्तित्वं प्रमाणितं स्यात्। एतस्मात् कारणात् चार्वाकाः आत्मनः पृथगस्तित्वं न स्वीकृतवन्तः। तद्धेतौ चार्वाकाः

सम्यक्तयोद्धृतवन्तः सर्वदर्शनसंग्रहे चार्वाकदर्शने – स्यादेष मनोरथो यद्यनुमानादेः प्रामाण्यं न स्यात्। (चक्रवर्ती) तस्मात्तेषां चार्वाकानां मतेनात्मनः पृथगस्तित्वं नाङ्गीकृतं स्यात् तस्मिल् काले यस्मिन् काले अनुमानादेर्प्रामाण्यं न स्यात्। तस्मात् कारणात् लोकायतिकाः देहातिरिक्तस्यात्मनः पृथगस्तित्वस्यास्वीकरणकाले सर्वप्रथममनुमानप्रमाणादेर्प्रामाण्यताखण्डनाय स्वयमेव पूर्वपक्षीरूपेण चार्वाकविरोधिमतमुपस्थाप्य पुनश्चोत्तरपक्षीरूपेण स्वमतमनुकूलतर्केन विरोधिनां मतं खण्डितवन्तः। अर्थात् चार्वाकविरोधिनोऽनुमानं प्रमाणरूपेण स्वीकुर्वन्ति – एतादृशं सिद्धान्तं पूर्वपक्षीरूपेणोपस्थापितवान् लोकायतिकाः सर्वदर्शनसंग्रहे चार्वाकदर्शने – अस्ति च प्रामाण्यम्। (चक्रवर्ती) यद्यनुमानप्रमाणस्य प्रामाण्यं न स्यात्तर्हि कथं धूमस्य ज्ञानादनन्तरं धूमध्वजे प्रेक्षावतः व्यक्तेर्प्रवृत्तिरुत्पद्यते। तथा च नदीतीरे फलमस्तीति वाक्यश्रवणानन्तरं फलाकाङ्क्षिनां नदीतटे प्रवृत्तिर्जायते। शास्त्रे उच्यते – कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्यते। नद्यास्तीरे फलानि सन्तीति वचनश्रवणसमनन्तरं फलार्थिनां नदीतीरे प्रवृत्तिरिति। (चक्रवर्ती) ते चार्वाकाः एवं प्रकारेण पूर्वपक्षीरूपेणानुमानं प्रमाणरूपेण स्थिरीकृत्य तदनुमानप्रमाणखण्डने प्रवृत्ताऽभवन्।

**अनुमितेरुत्पत्तिप्रक्रिया -**

शास्त्रे प्रसिद्धिरस्ति यत् – अनुमितिस्तु यथार्थज्ञानम्। तत्करणमनुमानञ्च। न्यायदर्शनसम्मततर्कसंग्रहग्रन्थे दृश्यते – यथार्थज्ञानमनुमितिः। अनुमितिकरणमनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः। (गोस्वामी) अर्थात् यथार्थज्ञानं तथाऽनुमितिः प्रमा। तस्याः प्रमारूपाऽनुमितेर्यदसाधारणं कारणं तदनुमानम्। तत्र स्पष्टतया प्रतीयते यत् परामर्शजन्यं तथा परामर्शादुत्पन्नं ज्ञानमनुमितिः स्यात्। अनुमितौ पञ्चावयववाक्यानि प्रयुक्तानि। उच्यते – पर्वतो वह्निमानिति प्रतिज्ञा। धूमादिति हेतुः। यः यो धूमवान् सः सो वह्निमान्, यथा महानसमित्युदाहरणम्। वह्निव्याप्यधूमवान्नयं पर्वतरित्युपनयः। तथा चायं पर्वतो वह्निमान्निति निगमनम्। निगमनं नाम ज्ञानमनुमितिः।

**लोकायतभिन्नप्रस्थानेऽनुमितौ व्याप्तिनिरूपणम् –**

पूर्वोक्तमस्त्यनुमितिः नाम ज्ञानं परामर्शजन्यं स्यात्। तस्मादधुना पुनः प्रश्नः जायते - को नाम परामर्शः? तर्कसंग्रहे प्राप्यते - व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। (गोस्वामी) अयं परामर्शः नामकः विषयोऽनुमितौ अतीव प्रसिद्धः। तस्मात् कारणात् परामर्श एवानुमितिं प्रति करणमनुमानं प्रमाणं वा भवति। यथा – वह्निव्याप्य धूमवान्नयं पर्वतः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः। (गोस्वामी) अर्थात् वह्निव्याप्य धूमवान्नयं पर्वतरिति वाक्यं खलु परामर्शः। पर्वतरूपपक्षे धूमरूपं हेतुं दृष्ट्वा वह्निरूपस्य साध्यस्यानुमानस्थले वह्निधूमयोर्व्याप्तिसम्बन्धस्य ज्ञानं स्थापितं स्यात्। व्याप्तिविशिष्टपक्षधर्मताज्ञानं जन्यते तद्धि। अस्य ज्ञानस्यापरं नाम खलु तृतीयलिङ्गपरामर्शः। न्यायादिदर्शने तत्त्वमिदं तृतीयलिङ्गपरामर्शज्ञानमनुमानप्रक्रियायामुपनयरूपावयववाक्यरूपेणाङ्गीकृतमभवतिति। लिङ्गमिति शब्दस्यार्थो भवति लीनं गच्छतीति लयं गच्छतीति वा। अतः लिङ्गशब्दस्यार्थो हेतुः साधनं वा। हेतुना साधनेन वा साध्यस्यानुमितिर्भवत्यनुमानप्रक्रियायाम्। एतस्मात् कारणादनुमानप्रमाणवादिनः प्रवदन्ति यत् व्याप्तिविशिष्टपक्षधर्मताज्ञानं खलु अनुमानपदवाच्यम्। यतो व्याप्तिर्भवत्यनुमानेऽन्यतमं कारणं ततो व्याप्तिनिरूपणं सर्वादौ करणीयमिति। न्यायशास्त्रे उक्तम् –

व्याप्तिस्तु साध्याभाववदवृत्तित्वं प्रकीर्तितम्।
व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः।।
अथवा हेतुमन्निष्ठविरहाप्रतियोगिना।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते।। (घोष)

तर्कसंग्रहेऽप्यतीव सरलतया संक्षेपेण सम्यग्रूपेण व्याप्तेर्लक्षणं प्रदत्तम्। तत्रोक्तम् – यत्र यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। (गोस्वामी) तत्रान्नंभट्टकृतदीपिकेति प्रसिद्धटीकायां दृश्यते – हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरण्यं

व्याप्तिः। (गोस्वामी) अर्थात् हेतोरधिकरणे विद्यमानोऽत्यन्ताभावः तत्प्रतियोगिभिन्नं यत्साध्यं तेन साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः। यथा – पर्वतो वह्निमान् धूमात् इत्यस्मिन्नुदाहरणे धूमादिति सद्धेतोरधिकरणं पर्वतः। तन्निष्ठः तथा पर्वतादौ वृत्तिरत्यन्ताभावः घटादौ विद्यमानः न वह्निरूपसाध्ये। अतः घटो भवत्यत्यन्ताभावस्य प्रतियोगी साध्यवह्निः तु तस्याऽत्यन्ताभावस्याप्रतियोगी। एवं प्रकारेणाप्रतियोगी साध्यं वह्निः हेत्वधिकरणनिष्ठात्यन्ताभावाप्रतियोगिवह्निरूपसाध्येन सार्कं स्थिते सति धूमौ वह्नेर्व्याप्तिर्भवति। परन्तु पर्वतो धूमवान् वह्नेः इत्यस्मिन् स्थले पर्वतः पक्षः धूमत्वं साध्यं वह्नित्वं हेतुः। अत्र वह्निरूपहेतौ आर्द्रेन्धनसंयोगरुपाधिः। साध्यं धूमत्वं महानसादौ यस्मिन्नधिकरणे तिष्ठति तत्र यदत्यन्ताभावोऽस्ति तस्मिन् स्थले आर्द्रेन्धनसंयोगः न तद्प्रतियोगी। धूमाधिकरणे आर्द्रेन्धनसंयोगस्याभावः न स्यात्। अतः आर्द्रेन्धनसंयोगः साध्यव्यापकम्। साधनं वह्निः यत्र तिष्ठति तत्रार्द्रेन्धनसंयोगाभावोऽस्ति। अतः साधनाव्यापकत्वं तत्र आर्द्रेन्धनसंयोगेऽस्ति। हेतुवह्नेरधिकरणं तप्तायःगोलकम्। तत्र तप्तायःगोलके साध्यस्य धूमस्यात्यन्ताभावोऽस्ति। तस्मात्तत्र साध्यं धूमत्वमत्यन्ताभावस्य प्रतियोगि स्यात्। हेतुमन्निष्ठाभावस्याप्रतियोगित्वं साध्ये धूमे नास्ति। अतः साध्येन धूमेन समं हेतो वह्नेः सामानाधिकरण्यं नास्ति। पुनश्च साध्यव्यापकत्वे सति साधनाव्यपकत्वमुपाधित्वमिति लक्षणानुसारेण पर्वतो धूमवान् वह्नेः इत्यस्मिन्ननुमाने आर्द्रेन्धनसंयोगरूपाधिः। यतः यत्र यत्र हेतुः तत्र तत्र साध्यमिति व्याप्तेर्नियमानुसारेणाप्यत्र यत्र यत्र हेतुवह्निः तत्र तत्र साध्यधूमः इति सर्वदापि न भवति। यथा – तप्तायःगोलकम्। किन्तु यत्र यत्रार्द्रेन्धनसंयोगत्वं तत्र तत्र धूमत्वमिति। अर्थात् धूमत्वं प्रत्यग्नौ आर्द्रेन्धनसंयोगस्तथोपाधि एव कारणम्। प्रकृततया यदा वह्नितः धूमः जायते तदा आर्द्रेन्धनसंयोगः कारणमिति। तस्मात् कारणात् पर्वतो धूमवान् वह्नेः इत्यत्रासद्धेतुस्थले व्याप्तेर्लक्षणं न प्रयुक्तमिति। तर्कसंग्रहे उपाधिश्चतुर्विधः कथितः। तद्यथा – केवलसाध्यव्यापकम्, पक्षधर्मावच्छिन्नसाध्यव्यापकम्, साधनावच्छिन्नसाध्यव्यापकम्, उदासीनधर्मावच्छिन्नसाध्यव्यापकमिति। अत अलक्ष्ये तथा व्याप्तौ लक्षणस्य गमनाभावेऽतिव्याप्तिदोषः निवारितः। पुनश्चोपाधिः द्विविधः- निश्चितः सन्दिग्धश्चेति। धूमोत्पन्नकालेऽग्नौ आर्द्रेन्धनसंयोगः निश्चितोपाधिः। तथा च मैत्रयीपुत्रः श्यामवर्णः शाकाद्याहारत्वात् – इत्यत्र शाकाद्याहारः सन्दिग्धोपाधिः। यतः पूर्वपुत्रोत्पन्नकाले मैत्रेय्याः शाकाद्याहारग्रहणेऽपि न श्यामवर्णपुत्रः जातः। एतादृशमुपाधिविहीनं व्याप्तिविशिष्टं पक्षधर्मताज्ञानं परामर्शः। तस्मादनुमानप्रमाणनामकात्परामर्शादनुमितिर्जायते इति न्यायमतेन।

**लोकायतप्रस्थानेऽनुमानप्रमाणम्-**

किन्तु अस्मिन् प्रसङ्गे चार्वाकाः घोषयन्ति यत् व्याप्तिविशिष्टपक्षधर्मताज्ञानं तथा परामर्श अनुमितौ मनोराज्यस्य कल्पनामात्रम्। अर्थात् येऽनुमानप्रमाणवादिनः वदन्ति अनुमितौ व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शो वा मूलम्। चार्वाकानां मते तु अनुमानप्रमाणवादिनामेतादृशी भावना सम्पूर्णतया मानसिककल्पना। एतादृशं कल्पनं प्रकृत्या मृषावचनम्। चार्वाकैरुक्तम् – तदेतन्मनोराज्यविजृम्भणं व्याप्तिपक्षधर्मताशालि हि लिङ्गं गमकमभ्युपगतमनुमानप्रामाण्यवादिभिः। (चक्रवर्ती) अनुमानप्रामाण्यवादिनः प्रवदन्ति यत् परामर्शायानुमानाय वा व्याप्तिज्ञानमावश्यकम्। तर्हि सम्प्रति प्रश्नः जायते – का नाम व्याप्तिः? तदुत्तरेऽनुमानप्रमाणवादिनः प्रवदन्ति - व्याप्तिस्त्वेकप्रकारकभूतः धूमवह्निसम्बन्धवत् हेतुसाध्ययोः नियतसाहचर्यसम्बन्धविशेषः यदितःपूर्वं विशदतया वर्णितम्। तथापि लोकायतप्रस्थाने व्याप्तेर्स्वरूपप्रसङ्गे प्रतिफलितमस्ति – व्याप्तिश्चोभयविधोपाधिविधुरः सम्बन्धः। (चक्रवर्ती) विधुरः नाम शून्यमभावोऽनस्तित्वं वा। संक्षेपार्थस्तु हेतुसाध्योभयविधोपाधिशून्या सम्बन्धविशेषव्याप्तिः। अतश्चाक्षुषादिषडेन्द्रियजन्ये प्रमाणे तथा प्रत्यक्षप्रमाणे सम्बन्धोऽयं

न प्रयुक्तः। परन्त्वयं विशेषसम्बन्धः ज्ञानोत्पन्नत्वात् पण्डितैर्गृहीतः। ईदृशस्य व्याप्तिज्ञानस्योपायः कीदृशः? लोकायतिकाः कथितवन्तः यत् प्रत्यक्षप्रमाणेन व्याप्तिज्ञानं कदापि न भवितुमर्हति। यतोहि प्रत्यक्षं द्विधाविभक्तम् – बाह्यप्रत्यक्षमाभ्यन्तरप्रत्यक्षञ्च। बाह्यप्रत्यक्षेण व्याप्तिज्ञानं कदापि भवितुं नार्हति। यतोऽअतीतानागतादिविषयाणामनुपस्थिते सति चक्षुरादिवाह्येन्द्रियेण साकं तद्बाह्यविषयाणां सन्निकर्षाभावात् बाह्यप्रत्यक्षं न स्यात्। यथा योग्यालोकितस्थले वर्तमाने दृश्यमाने घटे चक्षुरिन्द्रिययोः संयुत्के सति तथा संयोगसन्निकर्षत्वं प्राप्ते सति घटोऽयमिति प्रकारकं ज्ञानमुत्पद्यते। अस्मिन्नुदाहरणेऽयं घटः प्रकारकज्ञानोत्पत्तिस्थले हेतुसाध्ययोः नियतसहचारसम्बन्धविशेषदृष्टान्तः न परिदृश्यते। अतीतानागतकालेऽवस्थितस्यार्थस्य विषयस्य वा बाह्यप्रत्यक्षं न स्यात् सन्निकर्षाभावादित्युक्तम्। यस्मात् वाह्येन्द्रियाणि केवलं वर्तमानकालिकविषयाणां समीपे गत्वा तथेन्द्रियविषयसन्निकर्षेण बाह्यप्रत्यक्षं जायते। अतोऽत्र प्रत्यक्षप्रमाणेन तथेन्द्रियार्थसन्निकर्षेण घटोऽयमिति ज्ञानमुत्पद्यते नानुमानप्रमाणेन प्रत्यक्षप्रमाणे व्याप्तिसम्बन्धाभावात्। व्याप्तौ तु त्रैकालिकधूमाग्न्योः संग्रह आवश्यक इति न बाह्यप्रत्यक्षेण प्रत्यक्षं सम्भवति। सामान्यं तु धूमत्वमग्नित्वमिति। दृश्यते यत्त्रैकालिकानां वस्तुनां यथा धूमाग्निनां प्रत्यक्षज्ञानं नोत्पद्यते परन्तु धूमत्वाग्नित्वानां जातिनां प्रत्यक्षं सम्भवति। यतोहि त्रैकालिकविषयेऽपि धूमे धूमत्वमग्नौ अग्नित्वं स्यात् सामान्यस्य जातेर्वा नित्यधर्मत्वात्। अर्थात् धूमाग्न्युपाधिभेदेन वहुविधं भवितुमर्हति किन्तु वहुधूमे एकधूमत्वं वह्न्यौ एकाग्नित्वमिति सामान्यनियमात् त्रैकालिकसत्यम्। तस्मात् वर्तमानकाले यद्वत् धूमे धूमत्वमग्नौ अग्नित्वं तद्वदतीतानागतकालेऽपि धूमे धूमत्वमग्नौ अग्नित्वमङ्गीकृतम्। एतस्मात् कारणात् त्रैकालिकधूमत्वाग्नित्वादेः प्रत्यक्षं सम्भवति। एवञ्च धूमत्वस्याग्नित्वस्य चोपाधिभेदतया धूमाग्निसम्बन्धस्य ग्रहणे सति पर्वतादौ तयोः समानाधिकरण्यात् व्याप्तिज्ञानादनन्तरं व्याप्तिप्रत्यक्षमुत्पद्यते। अत्र व्याप्तिज्ञानन्तु सामान्यनिर्भरं ज्ञानं नोपाधिभेदेन गृह्यते। अस्मिन् पर्वतरूपे पक्षे धूमाग्नयोः व्याप्तिसम्वन्धः न स्वीकृतः। परन्तु सामान्यतया तत्स्वीकृतः व्याप्तिसम्वन्धः। अतः पर्वते धूमं दृष्ट्वा वह्न्यनुमानं कदापि न समम्भवं व्याप्तिसम्वन्धस्याभावात्। तस्मात् लोकायतिकेनोच्यते बाह्यप्रत्यक्षेण व्याप्तिज्ञानं न जातम्। तत्रोक्तं – न च व्याप्तिज्ञानं सामान्यगोचरमिति मन्तव्यं व्यक्तोरविनाभावाभावप्रसङ्गात्। (चक्रवर्ती) तदपि च व्याप्तिज्ञानमाभ्यन्तरप्रत्यक्षेणापि नोत्पद्यते। यस्मात् चक्षुकर्णादिभ्यो वाह्येन्द्रियेभ्यः मनः परतन्त्रं पराधीनं वा। यद्यपि न्यायनयानुसारेणात्मावस्थितानां सुखदुःखादिनां गुणानां साक्षात्कारे मन एवैन्द्रियरूपेण ग्राह्यं तथापि बाह्यप्रत्यक्षस्थले मनो वाह्येन्द्रियाणामुपर्यधीनं स्यात्। यथा धूमादिनां प्रत्यक्षज्ञानादनन्तरं वह्निप्रत्यक्षं स्यात् तथा बाह्यवस्तुत उत्पन्नं सुखदुःखानामान्तरानुभूतिः जायते। अतः यदि बाह्यप्रत्यक्षं न स्यात्तर्हि कुतो आभ्यन्तरप्रत्यक्षम्? तस्मात् कारणात् व्याप्तिज्ञानं प्रत्यक्षप्रमाणेन कदापि नोत्पन्नं भवतीति। अनुमानप्रमाणेनापि व्याप्तिज्ञानं न जायते। यस्मात् कारणात् व्याप्तिज्ञानार्थं यद्यनुमानप्रमाणं स्वीकृतं स्यात्तर्हि तदनुमानप्रमाणायापरमेकं व्याप्तिज्ञानमावश्यकम्। एवं प्रकारेण तद्प्रकारकं व्याप्तिज्ञानस्य स्वीकरणार्थमपरमेकं स्वीकर्तव्यमनुमानप्रमाणम्। अनेन प्रकारेण एकस्य स्वीकरणार्थमनेके स्वीकृते सति शास्त्रसम्मत अनवस्थादोषप्रसङ्गः जायते। अर्थात् व्याप्तिज्ञानमनुमानप्रमाणेन न स्यात्।

व्याप्तिज्ञानं शब्दप्रमाणेनापि न जायते। यतो वैशेषिकाचार्यः कणादमुनिः युक्त्या प्रतिष्ठितवान् यत् शब्दप्रमाणमनुमानप्रमाणस्यान्तर्गतमिति। पुनश्च शब्दप्रमाणं यदि अनुमानप्रमाणस्यान्तर्गतं न स्यात् अर्थात् शब्दप्रमाणमनुमानप्रमाणात् पृथक्प्रमाणरूपेण स्वीकृते सति तत्राप्यनवस्थादोषप्रसङ्गः दृश्यते। उच्यते – शाब्दज्ञानं भवति शक्तिग्रहेण। शक्तिग्रहस्योपायाः विविधाः। यथोक्तं न्यायशास्त्रे –

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।। (शुक्ल, न्यायसिद्धान्तमुक्तावली)

सुतरां शक्तिग्रहस्योपायेषु वृद्धव्यवहारः प्रसिद्धः। अर्थात् वृद्धव्यवहारनामकेन शक्तिग्रहोपायेन शाब्दज्ञानं भवति। वृद्धव्यवहारनामकस्य शक्तिग्रहस्योदाहरणं यथा – शक्तिग्रहस्तु वृद्धव्यवहारेण। तथा हि व्युत्पित्सुर्वालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य अश्वमानय गां वधानेति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्ति अश्वशब्दस्याश्वत्वविशिष्टे शक्तिरिति व्युत्पद्यते। (गोस्वामी) अर्थादत्र स्पष्टतया प्रतीयते गामानय गां बधान अश्वमानय अश्वं बधान – एतादृशानां वहुविधवाक्यानां श्रवणादनन्तरं ग्रहणवर्जनन्यायेन व्युत्पित्सुर्वालानां ज्ञानमुत्पद्यते। किन्तु शास्त्रीयवचनानुसारेणोच्यते एकस्य स्वीकारेऽनेकग्रहणमनवस्थादोषस्य प्रसङ्ग उत्थितः। शब्दप्रमाणस्थलेऽनवस्थादोषस्थिते सति व्याप्तिज्ञाने शब्दप्रमाणरूपोपायः न स्वीकृतरिति चार्वाकानां मतम्। सर्वदर्शनसंग्रहे कथितमस्ति – कणादमतानुसारेणानुमानम् एवान्तर्भावात्। अनन्तर्भावे वा वृद्धव्यवहाररूपलिङ्गावगतिसापेक्षतया प्रागुक्तदूषणलङ्घनाजङ्घालत्वात्। (चक्रवर्ती) धूम-धूमध्वजयोर्मध्येऽविनाभावो व्याप्तिसम्बन्धः विद्यमानः – वचनमिदं केवलं मन्वादिकथितशास्त्रवचनवत् विश्वासयोग्यम्। किन्तु न प्रकृततया सत्यवचनमिदम्। अतः यत्राविनाभावो व्याप्तिज्ञानं वा नास्ति तत्र स्वार्थानुमानपरार्थानुमानं कथं स्वीकार्यम्। तत्र प्रतिफलितमस्ति – अनुपदिष्टाविनाभावस्य पुरुषस्यार्थान्तरदर्शनेनार्थान्तरानुमित्यभावे स्वार्थानुमानकथायाः कथाशेषत्वप्रसङ्गाच्च। कैव कथा परार्थानुमानस्य। (चक्रवर्ती) उपमानप्रमाणेनापि व्याप्तिग्रहः व्याप्तिज्ञानं वा न सम्भवति। न्यायनये दृश्यते – उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। (गोस्वामी) अर्थात् उपमितिः प्रमा। तत्करणमुपमानं प्रमाणम्। संज्ञासंज्ञिसम्बन्धज्ञानमप्युपमितिपदवाच्यम्। एवञ्च सादृश्यज्ञानमुपमितेर्करणं तथोपमानप्रमाणम्। यथा – गोसदृशो गवयः। अत्र गो संज्ञा गवयः संज्ञी – अनयोर्द्वयोर्सादृश्यज्ञानमुपमानम्। अस्मिन् सादृश्यज्ञाने उपाधेर्विद्यमानत्वे सति तदुपाधिरुपमितिरूपप्रमाज्ञानस्य बाधिकारूपेणाभिहिता स्यात्। तथा चोपमानं प्रमाणरूपेण गृहीतं न स्यात्। यथा – धूमाग्नयोर्व्याप्तिसम्बन्धे आर्द्रेन्धनसंयोगरूपा उपाधिः विद्यमाना। सुतरामनौपाधिकहेतुसाध्यसम्बन्धस्तु व्याप्तिसम्बन्धः। परन्तूपाधिविधुरव्याप्तिः कदापि न भवति। तद्वत् संज्ञासंज्ञिसम्बन्धेऽपि व्याप्तिः न स्वीकृता यतः तत्राप्युपाधिशून्यता नास्ति। यथा – अग्नौ आर्द्रेन्धनसंयोगः न कृते सति धूमस्योत्पन्नं न स्यात्। अतो व्याप्तिसम्बन्धे संज्ञासंज्ञिसम्बन्धे वोपाधेरभावः कदापि भवितुं नार्हति। तस्मादुपमानप्रमाणमपि व्याप्तिप्रतिष्ठायां प्रकृष्टप्रमाणरूपेण न गृहीतमिति। तस्मादुच्यते - उपमानादिकन्तु दुरापास्तं तेषां संज्ञासंज्ञिसम्बन्धादिबोधनवत्वेनानौपाधिकसम्बन्धबोधकत्वसम्भवात्। किञ्च उपाध्यभावोऽपि दुरवगमः। (चक्रवर्ती) अनेन प्रकारेणोपमानस्य प्रामाण्यं खण्डितमिति।

एतादृशीनामुपाधिनां प्रत्यक्षत्वस्य विधेर्नियमो वा स्थितत्वात् प्रत्यक्षस्याभावस्य प्रत्यक्षत्वादप्रत्यक्षस्याभावस्याप्रत्यक्षत्वार्थमनुमानादेरिवानवस्थादोषोऽप्युपमानप्रमाणेऽस्ति। तर्ह्यधुना पुनः प्रश्न जायते – उपाधेर्लक्षणं किम्? तदुत्तरे चार्वाकाः प्रोक्तवन्तः – साध्यव्यापकत्वे सति साध्यसमव्याप्तिरिति तल्लक्षणं कक्षीकर्तव्यम्। तदुक्तम् – अव्याप्तसाधनो यः साध्यसमव्याप्तिरुच्यते स उपाधिरिति। (चक्रवर्ती) अर्थात् यत् साधनाव्यापकत्वे सति साध्यसमव्याप्तिः तदुपाधिरिति चार्वाकानां मतम्। एतादृशमुपाधेर्लक्षणं कृते सति दोषत्रयं तत्र दृष्टम्। यथा – सकर्तृकं घटत्वमश्रावता चेति। फलतयोपाधेर्निमित्तमिदं हेतुत्रयं स्वीकृते सति व्याप्तिज्ञानं वज्रप्रहारदोषेण लिप्तं स्यात्। चार्वाकसम्मतशास्त्रवचने दृश्यते –

तत्र विध्यध्यवसायस्योपाधिज्ञाने जाते तदभावविशिष्टसम्बन्धरूपं व्याप्तिज्ञानं व्याप्तिज्ञानाधीनं चोपाधिज्ञानमिति परस्पराश्रयवज्रप्रहारदोषो वज्रलेपायते। तस्मादविनाभावस्य दुर्बोधतया नानुमानाद्यवकाशः। (चक्रवर्ती) तस्मादुच्यते – नानुमानं प्रमाणम्। (भट्टाचार्य) एवं प्रकारेण अनुमानप्रमाणखण्डनेन चार्वाकाः महत्वं प्रदर्शितवन्तः।

**शब्दप्रमाणखण्डनम्**

प्रमाणाष्टकेषु शब्दप्रमाणमन्यतममिति चार्वाकेतरदर्शनप्रमाणप्रस्थाने स्वीकृतम्। शब्दस्य लक्षणप्रसङ्गे न्यायनये कथितमस्ति – आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। (गोस्वामी) यः भ्रमः प्रमादः विप्रलिप्सा करणापाटवश्चेति दोषविवर्जितः स एवाप्तस्तथा यथार्थवक्ता। तेनोच्चारितं पदसमूहात्कं वाक्यं शब्दरिति। शाब्दबोधे शक्तिग्रहस्तु सहकारिकारणम्। भाषापरिच्छेदे मुक्तावलीटीकायां यदुक्तमस्मिन् विषये तदालोचितमनुमानप्रमाणप्रसङ्गे इतःपूर्वम्। तत्रोक्तमाप्तवाक्याद् शाब्दबोधः जायते। आप्तपदस्यार्थः भवति चतुष्टयदोषविवर्जितो वक्ता। अयं वक्ता लौकिकालौकिकभेदेन द्विविधः। लौकिकप्रवक्ता खल्विहसंसारे विद्यमानः सर्वपुरुषो वाल्मीकिव्यासादिवत्। अलौकिकाप्तवक्ता त्वीश्वरादिवत्। ईश्वरस्तुलौकिकापौरुषेयः। तदीश्वरकथितं वाक्यमपौरुषेयं वाक्यमाप्तवाक्यञ्च। अपौरुषेयं वाक्यं वेदरिति सर्वजनप्रसिद्धं वचनम्। शास्त्रे प्रतिफलितमम् –

पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता।
काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवद्।।
समाख्याध्यापकत्वेन वाक्यत्वं तु पराहतम्।
तत् कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता।। (व. भट्टाचार्य)

वेदश्चतुर्विधः ऋक्-साम-यजुः-अथर्वभेदात्। प्रतिवेदे पुनरपि चतुर्विभागोऽस्ति। यथा – संहिता तथा मन्त्रो ब्राह्मणमारण्यकोपनिषद्भेदात्। ब्राह्मणांशः कर्मकाण्डान्तर्गतः। उच्यते भारतीयो वाङ्मये – विधायकं वाक्यं ब्राह्मणम्। कर्मचोदना ब्राह्मणानि। (व. भट्टाचार्य) अस्मिन् ब्राह्मणांशे वेदसम्मतयागादेरालोचना प्रतिफलिता। यागादिवैदिककर्मणां प्रतिफलनत्वात् ब्राह्मणं कर्मकाण्डरूपेण प्रसिद्धम्। तद्वतदुपनिषद् ब्रह्मविद्येति प्रसिद्धा। विद्येति शब्दस्यार्थः ज्ञानम्। अर्थात् विशुद्धज्ञानात्मकालोचनोपनिषदंशे परिलक्षिता। तस्मात् कारणादुपनिषद् ज्ञानकाण्डरूपेण परिचिता। कर्मकाण्डे परिलक्ष्यते – वेदसम्मतयागयज्ञादिकर्ममाध्यमेन स्वर्गरूपमुक्तिर्प्राप्तिर्भवतीति। ज्ञानकाण्डे दृश्यते – विशुद्धज्ञानमार्गेण मोक्षप्राप्तिर्भवति। तस्मात् वहुवित्तस्य व्ययं कृत्वा शारीरिकप्रयासेन च यज्ञकर्ताऽग्निहोत्रादियज्ञं करोति पारलौकिकसुखलाभायेत्युच्यते कर्मकाण्डे तथा ब्राह्मणांशे। यथा – अग्निहोत्रं जुहुयात् स्वर्गकामः। (Datta) अन्यत्र तु ज्ञानकाणडे तथोपनिषदंशे उच्यते यत् न कर्मणा मोक्षः जायते। तस्मात्तत्रोक्तम् – कर्मणा पितृलोको विद्यया देवलोकः। (अतुलचन्द्र सेन) तथा चोक्तम् – विद्ययाऽमृतमश्नुते। (गम्भीरानन्द) अस्मिन् प्रसङ्गे चार्वाकैरुक्तम् – ननु पारलौकिकसुखाभावे वहुवित्तव्ययशरीरायाससाध्ये अग्निहोत्रादौ विद्यावृद्धाः कथं प्रवर्त्तिष्यन्ते इति चेत् तदपि न प्रमाणकोटिं प्रवेशमीष्टे। (चक्रवर्ती) अर्थात् ज्ञानमार्गे रताः कथं वहुवित्तव्ययायाससाध्ये वैदिककर्मणि प्रवृत्ताः। सुतरां ज्ञानकाण्ड-कर्मकाण्डयोर्मध्ये विवादः जातः केवलं वेदवाक्यस्यानृतव्याघातपुनरुक्तदोषत्वात्। अत्रोच्यते – वेदः नाप्तशास्त्रम्। तत्रानृतं तथा मिथ्या, व्याघातं तथा विरोधिता एवञ्च पुनरुक्तीति दोषत्रयमस्ति। अतः वेदवाक्यं न शब्दप्रमाणरूपेण गृहीतव्यमिति। तथा च शास्त्रमिदं केवलमुत्पन्नं बुद्धिपौरुषहीनानां जीविकाप्रयोजनात्। चार्वाकनये उद्घोषितम् – अनृतव्याघातपुनरुक्तदोषैर्दूषिततया वैदिककर्मण्येरेव धूर्तवकैः परस्परं कर्मकाण्डप्रामाण्यवादिभिर्ज्ञानकाण्डस्य ज्ञानकाण्डवादिभिः कर्मकाण्डस्य च प्रतिक्षिप्तत्वेन त्रय्या धूर्तप्रलापमात्रत्वेनाग्निहोत्रादेर्जीविकामात्रप्रयोजनत्वात्। तथा चाभाणकः –

अग्निहोत्रस्त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः।। (चक्रवर्ती)

वेदवाक्येऽनृतं तथा मृषाभाषणं विद्यते। यथा श्राद्धकाले मृतजनस्य कृते यद्वेदविहितकर्म क्रियते तन्मिथ्यामूलकं कर्मेति। सुयुक्त्या चार्वाकाः प्रवदन्ति –

मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्।
निर्वाणस्य प्रदीपस्य स्नेहः संबर्धयेत् शिखाम्।।
गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्।
गेहस्तत्कृतश्राद्धेन पथितृप्तिवारिता।। (चक्रवर्ती)

व्याघातदोषोऽपि वेदे दृश्यते यत् यथोक्तमितःपूर्वं ज्ञानकाण्ड-कर्मकाण्डयोर्विरोधमध्ये। पुनश्च पुनरुक्तिदोषः तत्रापि प्रतिफलितः। यथा स्वर्गकल्पनायां वेदे कथितम् – अग्निहोत्रं जुहुयात् स्वर्गकामः। (Datta) अनन्तरमुच्यते – ज्योतिष्टोमेन स्वर्गकामो यजेत (Datta) इत्यादिवत्। ईश्वरोऽपि अलौकिकपुरुषरूपेण चार्वाकदर्शने न स्वीकृतः। तत्रोच्यते – लोकसिद्धो राजा परमेश्वरः। (चक्रवर्ती) ईस्वरस्यास्तित्वसम्बन्धे चार्वाकनये दृश्यते – ईश्वरासिद्धेः। प्रमाणाभावान्न तत्सिद्धिः। (अ. भट्टाचार्य) अतो वेदः न नित्यशास्त्रम्। सूत्रे प्रतिफलितम् - न नित्यत्वं वेदानां कार्यत्वश्रुतेः। (अ. भट्टाचार्य) तस्मात् कारणात् चार्वाकनये शब्दः प्रमाणरूपेण न स्वीकृतः। तत्रोच्यते – अप्रमाणं शब्दः। (अ. भट्टाचार्य) एवं प्रकारेण प्रत्यक्षप्रमाणवादिनः चार्वाकाः शब्दप्रमाणं खण्डितवन्तः।

**प्रत्यक्षप्रमाणमण्डनम् -**

अनुमानोपमानशब्दप्रमाणखण्डनादनन्तरं लोकायतिकनां चार्वाकानां मतानुसारं प्रत्यक्षस्य प्रमाणस्य मण्डनमालोच्यते। चार्वाकदर्शनेषु देहात्मवादः भूतचतुष्टयवादश्चादिः स्वीकृतः। तत्र जन्मान्तरवाद-परलोकवाद-कार्य-कारणवाद-सर्वजनप्रसिद्धेश्वरतत्त्वसम्बन्धीयमतवादः पाप-पूण्यमात्मनः पृथगस्तित्वञ्च खण्डितम्। एतादृशानां महत्तत्त्वानां खण्डनं स्यात् केवलं प्रत्यक्षप्रमाणं प्रमाणरूपेण ग्राह्यत्वात्। चार्वाकनयेऽतीतानागतविषयाणां प्रत्यक्षयोग्यत्वस्य अभावत्वात्तदपि नाङ्गीकृतम्। तत्र चार्वाकनये वर्तमानकालिकविषयाणां केवलं प्रत्यक्षयोग्यत्वमस्तीत्यङ्गीकृतम्। प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वात्... (शुक्ल, सांख्यतत्त्वकौमुदी) इति नियमात् सर्वे दार्शनिकाः प्रत्यक्षं स्वीकुर्वन्ति। तस्मात् कारणात् चार्वाकदर्शने महावाक्यरूपेणोक्तमस्ति –

यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पीवेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।। (चक्रवर्ती)

प्रत्यक्षलक्षणं तत्र चार्वाकपरम्परायां सम्यग्रूपेण न दृश्यते। किन्त्वन्यत्र प्राप्यते – इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्विविधं निर्विकल्पकं सविकल्पकञ्चेति। (गोस्वामी) अत्रेन्द्रियेन सहार्थस्य तथा विषयस्य सन्निकर्षात्तथा संयोगादिसम्बन्धात् प्रत्यक्षमुत्पद्यते। अनेन प्रत्यक्षप्रमाणेनाकाशात्मादिपदार्थानां प्रामाण्यं न स्यात्। तस्मात्तत्र आकाशात्मादिपदार्थानां पृथगस्तित्वं चार्वाकदर्शने नाङ्गीकृतम्। तद्धेतौ तेषां मते – प्रत्यक्षमेव प्रमाणम्। (अ. भट्टाचार्य) अन्यत्राप्युच्यते –

प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः।
अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते।।
क्वापि दृष्टमदृष्टञ्चेददृष्टं ब्रुवते कथम्।
नित्यदृष्टं कथं सत् स्यात् शशशृङ्गादिभिः समम्।। (अ. भट्टाचार्य)

आचार्यस्य माधवस्य कृतौ सर्वदर्शनसंग्रहे स्पष्टतया परिलक्ष्यते चार्वाकमतम् – प्रत्यक्षैकप्रमाणवादितयानुमानादेरनङ्गीकारेण प्रामाण्याभावात्। (चक्रवर्ती) अतः विविधदर्शनवत्

चार्वाकदर्शनेऽपि स्वाभाविकतया वर्तमानकालिकविषयकं स्वीकरणार्थं प्रत्यक्षं प्रमाणरूपेण स्वीकृतं मण्डितञ्चेति।

**उपसंहृतिका**

भारतीयदर्शनपरम्परायां चार्वाकाः नास्तिकशिरोमणिरूपेण परिचिताः सन्ति। भारतीये वाङ्मये विविधे शास्त्रे चार्वाकानामुपस्थितिर्लक्षणीया। तेषां रचितग्रन्थानां स्वल्पतासत्वेऽपि तत्त्वगतवैचित्र्यं सर्वजनप्रसिद्धं रमणीयञ्चेति कारणात् ते लोकायतिका अभिधया विभूषिताः। चार्वाकास्तेषां समर्थितमतवादान् स्वीकरणार्थतीव सुकौशलेनानुमानप्रमाणादिप्रमाणं खण्डनं कृत्वा केवलं प्रत्यक्षप्रमाणं मण्डनं कृत्वा भारतीयशास्त्रीयपरम्परायां नैपुण्यं प्रदर्शितवन्तः। तदपि च वक्तुमर्हति यत् चार्वाकेतरभारतीयदर्शनानां तत्त्वगतमतसौष्ठवं विकाशाय चिन्तनवैचित्रस्य समृद्ध्यर्थञ्च दर्शनप्रस्थाने चार्वाकानां योगदानमतीव गुरुत्वपूर्णमिति शम्।

**ग्रन्थपञ्जी**

**मुख्यग्रन्थाः**


1. *अष्टाध्यायी सूत्रपाठः*(पाणिनिकृतः),गुरुप्रसाद शास्त्री(वृत्तिकारः सम्पादकश्च), संस्करण 2015, चौखाम्वा सुरभारती प्रकाशन, वाराणसी
2. *उपनिषद्*, अतुल चन्द्र सेन, सीतानाथ तत्त्वभूषण, महेशचन्द्र घोष(सम्पादकाः), संस्करण 2018, हरफ प्रकाशनी, कलकाता
3. *तर्कभाषा*(केशवमिश्रकृता), सत्यजित् लायेक(सम्पादकः), पुनर्मुद्रण 2य संस्करण 2017, संस्कृत वुक डिपो, कलकाता
4. *तर्कसंग्रहः*(अन्नंभट्टकृतः), नारायण चन्द्र गोस्वामी(सम्पादकः), 3य संस्करण 1413 बङ्गाव्दः, संस्कृत पुस्तक भाण्डार, कलकाता
5. *न्यायसिद्धान्तमुक्तावली*(विश्वनाथकृता), हरिराम शुक्ल(सम्पादकः), संस्करण 2019, चौखाम्वा प्रकाशन, वाराणसी
6. *मनुसंहिता*(मनुकृतः), पञ्चानन तर्करत्न(सम्पादकः), संस्करण 1993, संस्कृत पुस्तक भाण्डार, कलिकाता
7. *मानोमेयोदयः*(नारायणभट्टकृतः), दीननाथ त्रिपाठी(सम्पादकः), संस्करण 1990, संस्कृत कलेज, कलिकाता
8. *वेदान्तसारः*(सदानन्दकृतः), स्वामी अमृतत्वानन्द(सम्पादकः), संस्करण 2016, उद्बोधन कार्यालय, कलकाता
9. *सर्वदर्शनसंग्रहः(श्रीमत्सायणमाधवाचार्यप्रणीतः),* अभ्यंकरोपाह्ववासुदेवशास्त्री (व्याख्याकारः), संस्करणम् 1924, प्राच्यविद्यासंशोधनमन्दिरम्, पुण्यपत्तनम्
10. *सायणमाधवीयसर्वदर्शनसंग्रहे चार्वाक-बौद्ध-जैनदर्शन*, अमित भट्टाचार्य(सम्पादकः), अखण्ड संस्करण 2013, संस्कृत पुस्तक भाण्डार, कलकाता
11. *सायणमाधवीयसर्वदर्शनसंग्रहः*(1म खण्ड), सत्यज्योति चक्रवर्ती(सम्पादकः), संस्करण 2014, साहित्यश्री, कलकाता
12. *सांख्यकारिका*(ईश्वरकृष्णविरचिता), ज्वालाप्रसाद गौड़(सम्पादकः), संस्करण 2016, चौखाम्वा विद्याभवन, वाराणसी
13. *सांख्यकारिका*(ईश्वरकृष्णविरचिता), थानेशचन्द्र उपैति(सम्पादकः), संस्करण 2011, चौखाम्वा संस्कृत प्रतिष्ठान, दिल्ली
14. *सांख्यतत्त्वकौमुदी*(वाचस्पतिमिश्रकृता), हरिराम शुक्ल(सम्पादकः), 2य संस्करण 2011, चौखाम्वा प्रकाशन, वाराणसी

**गौणग्रन्थाः**

1. घोष, दीपक, *भाषापरिच्छेदसमीक्षा,* कलकाता, संस्कृत पुस्तक भाण्डार, संस्करण 2003
2. बन्द्योपाध्याय, शान्ति, *वैदिक साहित्येर रूपरेखा,* कलिकाता, संस्कृत पुस्तक भाण्डार, संस्करण 1993
3. बागची, योगेन्द्रनाथ, *भारतीय दर्शनशास्त्रेर समन्वय,* कलिकाता विश्वविद्यालय, संस्करण 2013
4. भट्टाचार्य, उमेशचन्द्र, *भारतदर्शनसार,* कलिकाता, विश्वभारती ग्रन्थालय, संस्करण बङ्गाव्दः 1356
5. भट्टाचार्य, विमानचन्द्र, *संस्कृत साहित्येर रूपरेखा,* कलिकाता, विद्योदय लाइब्रेरी प्रा. लि., संस्करण 2000
6. शर्मा, पूर्णचन्द्र, *सांख्यकारिका,* कलकाता, पश्चिमबङ्ग राज्य पुस्तक पर्षत्, संस्करण 2007
7. शास्त्री, दक्षिणारञ्जन, *चार्वाक दर्शन,* कलकाता, पश्चिमबङ्ग राज्य पुस्तक पर्षत्, संस्करण 2013
8. Chatterjee KN. Mimamsa Nyaya Prakasa of Apadeva, Calcutta, Rabindra Bharati University, Ed. 1993.
9. Datta Pradyot Kumar, *Arthasamgraha*, Kolkata, Sanskrit Pustak Bhandar, Ed. 2002.
10. Radhakrishnan S. Indian Philosophy, London, George Allen & Unwin Ltd., Ed. 1923, I.